# Satyavratarajna Kritam Matsyarupi Vishnu Stotram

# સત્યવ્રતરાજ્ઞા કૃતં મત્સ્યરૂપી વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Satyavratarajna Kritam Matsyarupi Vishnu Stotram

File name : satyavratarAjnAkRRitaMmatsyarUpIviShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 8/24/46-53||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

# સત્યવ્રતરાજ્ઞા કૃતં મત્સ્યરૂપી વિષ્ણુસ્તોત્રમ્

રાજોવાચ ।
અનાદ્યવિદ્યોપહતાત્મસંવિદ-
સ્તન્મૂલસંસારપરિશ્રમાતુરાઃ ।
યદૃચ્છયેહોપસૃતા યમાપ્નુયુ-
ર્વિમુક્તિદો નઃ પરમો ગુરુર્ભવાન્ ॥ ૪૬॥

જનોઽબુધોઽયં નિજકર્મબન્ધનઃ
સુખેચ્છયા કર્મ સમીહતેઽસુખમ્ ।
યત્સેવયા તાં વિધુનોત્યસન્મતિં
ગ્રન્થિં સ ભિન્દ્યાદ્ધૃદયં સ નો ગુરુઃ ॥ ૪૭॥

યત્સેવયાગ્નેરિવ રુદ્રરોદનં
પુમાન્ વિજહ્યાન્મલમાત્મનસ્તમઃ ।
ભજેત વર્ણં નિજમેષ સોઽવ્યયો
ભૂયાત્સ ઈશઃ પરમો ગુરોર્ગુરુઃ ॥ ૪૮॥

ન યત્પ્રસાદાયુતભાગલેશ-
મન્યે ચ દેવા ગુરવો જનાઃ સ્વયમ્ ।
કર્તું સમેતાઃ પ્રભવન્તિ પુંસ-
સ્તમીશ્વરં ત્વાં શરણં પ્રપદ્યે ॥ ૪૯॥

અચક્ષુરન્ધસ્ય યથાગ્રણીઃ કૃત-
સ્તથા જનસ્યાવિદુષોઽબુધો ગુરુઃ ।
ત્વમર્કદૃક્સર્વદૃશાં સમીક્ષણો
વૃતો ગુરુર્નઃ સ્વગતિં બુભુત્સતામ્ ॥ ૫૦॥

જનો જનસ્યાદિશતેઽસતીં મતિં
યયા પ્રપદ્યેત દુરત્યયં તમઃ ।
ત્વં ત્વવ્યયં જ્ઞાનમમોઘમઞ્જસા

પ્રપદ્યતે યેન જનો નિજં પદમ્ ॥ ૫૧॥

ત્વં સર્વલોકસ્ય સુહૃત્પ્રિયેશ્વરો
હ્યાત્મા ગુરુર્જ્ઞાનમભીષ્ટસિદ્ધિઃ ।
તથાપિ લોકો ન ભવન્તમન્ધધી-
ર્જાનાતિ સન્તં હૃદિ બદ્ધકામઃ ॥ ૫૨॥

તં ત્વામહં દેવવરં વરેણ્યં
પ્રપદ્ય ઈશં પ્રતિબોધનાય ।
છિન્ધ્યર્થદીપૈર્ભગવન્ વચોભિ-
ર્ગ્રન્થીન્ હૃદય્યાન્ વિવૃણુ સ્વમોકઃ ॥ ૫૩॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે અષ્ટમમસ્કન્ધે ચતુર્વિંશાધ્યાયાન્તર્ગતં
(સત્યવ્રત)રાજ્ઞા કૃતં મત્સ્યરૂપી વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૮/૨૪/૪૬-૫૩॥

bhAgavatapurANa . adhyAya 8/24/46-53..

Proofread by PSA Easwaran

---

*Satyavratarajna Kritam Matsyarupi Vishnu Stotram*

pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*